व० प० २०८ अध्या० । तस्याधिरथपुत्त्रत्वप्राप्तिकथा स हि कन्यावस्थायां सूर्य्येण कुन्त्याम् उत्पादितः पश्चाच्च तया स्वकुलभयात् जले त्यक्तः अधिरथेन गृहीतो वर्द्धितश्च यथोक्तं "निगूहमाना जातं वै बन्धुपक्षभयात्तदा। उत्ससर्ज्ज जले कुन्ती तं कुमारं यशस्विनम् । तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः । राधायाः कल्पयामास पुत्रं सोऽधिरथस्तदा । चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ । दम्पती वसुषेणेति" भा०आ०६७अ० ।

**आधिराज्य** न० अधिराजस्य भावः कर्म्म वा ष्यञ् । आधिपत्ये "बभौ भूयः कुमारत्वादाधिराज्यमवाप्य सः" रघुः ।

**आधिवेदनिक** त्रि० अधिवेदनाय विवाहोपरिविवाहाय हितं ठक् तत्र काले दत्तं ठञ् वा । अधिवेदनार्थं तत्र काले च स्त्रियै पत्या दीयमाने स्त्रीधनभेदे । "पितृमातृपतिभ्रातृ दत्तमध्यग्न्युपागतम् । आधिवेदनिकञ्चैव स्त्रीधनं परिकीर्त्तितम्" या०स्मृ० "यच्च द्वितीयविवाहार्थिना पूर्वस्त्रियै पारितोषादिकं धनं दत्तं तदाधिवेदनिकमधिकस्त्रीलाभार्थत्वात्तस्येति" दायभा०। मिताक्षरायां तु "आधिवेदनिकाद्यञ्चेति" पठितम् आधिवेदनिकम् अधिवेदननिमित्तमिति व्याख्यातञ्च आद्यपदेन क्रयरिक्थादिप्राप्तस्य ग्रहणमित्युक्तम् । तत्र अधिवेदननिमित्तदाने विशेषः या० स्मृत्युक्तः "अधिविन्नस्त्रियै देयमाधिवेदनिकं समम् न दत्तं स्त्रीधनं यस्या दत्ते त्वर्द्धं प्रकल्पयेत्" "एतदपि सामर्थ्ये असामर्थ्ये तु यत् किञ्चित् भरणपर्य्याप्तं दत्त्वा परितोषयेदिति भेदः । "एकामूढ्वा तु कामार्थमन्यां वोढुं यदृच्छति । समर्थस्तोषयित्वार्थैः पूर्व्वोढामपरां वहेत्" स्मृतौ समर्थपदस्वारस्यात्तथात्वम् । एवमेव मदनपारिजातविधानपारिजातादयः ।

**आधिस्तेन** पु० आधेर्गोप्याधेर्भोगात् स्तेनइव । गोप्याधेर्बलात्कारेण भोक्तरि । "न भोक्तव्यो बलदाधिर्भुञ्जानोवृद्धिमुत्सृजेत् । मूल्येन तोषयेदेनमाधिस्तेनोऽन्यथा भवेत्" मनुना तद्भोगे स्तेनत्वस्योक्तेस्तथात्वम् ।

**आधीकरण** न० अनाधिराधिक्रियते आधि+च्वि+कृ-ल्युट् । बन्धकीकरणे आधिशब्दे मिताक्षरावाक्ये उदा०" क्त आधीकृतः । दत्तबन्धके द्रव्यादौ त्रि० ।

**आधुत** त्रि०आ+धु—क्त । चालिते । [अप्राचीने च स्त्रियां ङीप्

**आधुनिक** त्रि०अधुना भवः ठञ् । १साम्प्रतभवे २अर्वाचीने

**आधृष्टि** त्रि० आ+धृष-भावे क्तिन् । १परिभवे २बलाद्निग्रहे च ।

**आधेय** त्रि० आ+धा—कर्म्मणि यत् । १उत्पाद्ये । "आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः" व्या०का०। यस्य सतो गुणान्तरमुत्पाद्यम् २तादृशे उतपाद्यगुणान्तरे विद्यमाने एव यत्र घटादिपदार्थे पाकादिना रक्ततागुणान्तरमाधीयते तादृशे घटादौ । आधानविधिना ३स्थापनीये वह्नौ पु०। ४अधिकरणेऽभिनिवेशनीये "अधिकं पृथुलाधारादाधेयाधिक्यवर्ण्णनम्" चन्द्रा०। ५स्थापनीये द्रव्ये च । भावे यत् । ६आधाने न०। "अग्न्याधेयम्" आश्व० श्रौ०सू० । "अन्यतराभावे कार्या प्रागग्न्याधेयात्" बौधा०सू० ।

**आधोरण** पु० आ+धोर—गतिचातुर्ये ल्यु । हस्तिगतिचातुर्ययुक्ते हस्तिपके । स्वल्पबलेनापि महाबलस्य हस्तिनः सङ्केतादिनैव चालनात्तस्य गतिचातुर्य्यवत्त्वात्तथात्वम् ।

**आध्मात** त्रि० आ+ध्मा—क्त। १शब्दिते, २दग्धे, ३वातदोषजातोदरस्फीततासम्पादकरोगयुक्ते "साटोपमत्युग्ररुजमाध्मातमुदरं भृशम्" सुश्रु० । भावे क्त ४आध्माने न० ।

**आध्मान** पु० आ+ध्मा-आधारे ल्युट् । "आध्मानमिति जानीयाद्दोषं वातनिरोधकृत्" इत्युक्ते १वातव्याधौ । "मूत्रञ्च मूत्रं मुहुर्मुहुः प्रवृत्तिं वस्तितोदमाध्मानञ्च" सुश्रु० भावे ल्युट् । २उदरस्फीततायाम् । ३अग्निसंयोगजे शब्दभेदे न० । करणे ल्युट् । ४नलिकानामगन्धद्रव्ये स्त्री० ङीप् ।

**आध्मापन** न० आ+ध्मा—णिच्—पुक्-भावे ल्युट् । १शब्दनिष्पादने २आध्माननिष्पादने सुश्रुतोक्ते ३शल्यापसारणीयव्यापारभेदे च । "अणून्यन्तशल्यानि परिषेचनाध्मापनैर्बालवस्त्रपाणिभिः प्रमार्ज्जयेत्" सुश्रु० ।

**आध्यक्ष्य** न० अध्यक्षस्य भावः ष्यञ् । १अधिष्ठातृत्वे २अधिकर्त्तृव्यापारे ३प्रत्यक्षत्वे च । [स्मृतौ

**आध्या** स्त्री आ+ध्यै—भावे अङ् । १चिन्तने २औत्सुक्येन

**आध्यात्मिक** त्रि० आत्मानं मनःशरीरादिकमधिकृत्य भवः ठञ् । शोकमोहज्वरादिरूपे दुःखे । आधिदैविकशब्देऽस्य विवृतिः । [ब्धकस्मरणे च ।

**आध्यान** न० आध्यै+—ल्युट् । १चिन्तायाम्, २उत्कण्ठापूर्व्व

**आध्यापक** पु०अध्यापकएव स्वार्थेऽण् । अध्यापके शब्दरत्ना०

**आध्यायिक** पु० अधीयतेऽध्यायोऽध्येयोवेदस्तमधीते ठञ् । अधीतवेदे "युवा स्यात् साधुयुवाध्यायिकः" तैत्ति०उ० । "आध्यायिकोऽधीतवेदः" भा० ।

**आध्यासिक** त्रि० अध्यासेन कल्पितः ठक् । वेदान्तिमते अध्यासेन कल्पिते अतद्वति तत्त्वारोपेण कल्पिते पदार्थे यथा शुक्तिकादौ रजतादि कल्पितम् एवं ब्रह्मणि जगदादि